International Journal of Sanskrit Research 2023; 9(4): 132-138

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(4): 132-138
© 2022 IJSR
www.anantaajournal.com
Received: 01-05-2023
Accepted: 07-06-2023

**गिरीशभट्टः बि**
Ph.D. शोधच्छात्रः, ज्यौतिष-वास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आंध्र प्रदेश, भारत

**Corresponding Author**:
**गिरीशभट्टः बि**
Ph.D. शोधच्छात्रः, ज्यौतिष-वास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आंध्र प्रदेश, भारत

# वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे प्रथमाविभक्तिविमर्शः

**गिरीशभट्टः बि**

**सारांशः**
संस्कृतभाषायाम् आहत्य सप्त विभक्तयः सन्ति – प्रथमाविभक्तिः, द्वितीयाविभक्तिः, तृतीयाविभक्तिः, चतुर्थीविभक्तिः, पञ्चमीविभक्तिः, षष्ठीविभक्तिः, सप्तमीविभक्तिः चेति । एतान्यतिरिच्य सम्बोधनप्रथमाविभक्तिरिति या विभक्तिः प्रयुज्यते सा प्रथमाविभक्तावेवान्तर्भवति । एवमाहत्य संस्कृतभाषायां सप्तैव विभक्तयः । भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुदी इति एकः व्याकरणग्रन्थः विरचितः, यत्र पाणिनिमहर्षेः अष्टाध्यायीग्रन्थान्तर्गतानां सूत्राणां प्रक्रियानुसारेण अनुक्रमणिकां कृत्वा व्याख्यानं कृतमस्ति । महर्षिणा पाणिनिना अष्टाध्याय्यां अष्टसु अध्यायेषु (द्वात्रिंशत्-पादेषु) अनुवृत्त्यनुसारेण सूत्राणि विरचितानि । तान्येव सूत्राणि वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन प्रक्रियानुसारेण सङ्गृह्य तेषां सोदाहरणं व्याख्यानं कृतम् । प्रक्रियानुसारेण सूत्राणि वर्गीकृत्य भिन्नभिन्नप्रकरणेषु तानि व्याख्यातानि । अत्र भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां कृतानाम् अष्टाध्यायीव्याख्यानां 'वृत्ति'रिति संज्ञा । एवं कारकप्रकरणम् इति वैयाकरणसिद्धान्तकौमुद्याः प्रकरणे सप्तानां विभक्तीनां सम्बद्धानाम् अष्टाध्याय्याः सूत्राणां चर्चा कृता अस्ति भट्टोजिदीक्षितेन। तत्रादौ "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[1], एवञ्च "सम्बोधने च"[2] इत्याभ्यां सूत्रभ्यां प्रथमा विभक्तिः केषु केषु सन्दर्भेषु प्रयोक्तव्या ? इति विवेचितमस्ति । एतदधिकृत्य शोधपत्रेऽस्मिन् चर्चा क्रियते ।

**कूटशब्दः** प्रातिपदिकम्, लिङ्गम्, परिमाणम्, वचनम्, सम्बोधनम्

## प्रस्तावना

### प्रथमाविभक्तिविधायकं प्रथमं सूत्रम् – प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा

एतत् प्रथमाविभक्तिविधायकं प्रधानसूत्रं वर्तते । सूत्रमिदं महर्षिणा पाणिनिना विरचितायाः अष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादस्य षट्चत्वारिंशत्तमं सूत्रं भवति । अस्य सूत्रस्य व्याख्या भट्टोजिदीक्षितेन अधोनिर्दिष्टप्रकारेण कृता वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे –

[1] अष्टाध्याय्यां द्वितीयाध्यायस्य तृतीयपादस्य ४६ तमं सूत्रम् । वैयाकरणसिद्धान्तकौमुद्यां ५३२ तमं सूत्रम् ।

[2] अष्टाध्याय्यां द्वितीयाध्यायस्य तृतीयपादस्य ४७ तमं सूत्रम् । वैयाकरणसिद्धान्तकौमुद्यां ५३३ तमं सूत्रम् ।

नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये सङ्ख्यामात्रे च प्रथमा स्यात् । उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम् । अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य । तटः, तटी, तटम् । परिमाणमात्रे द्रोणो व्रीहिः । द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः । प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः । वचनं सङ्ख्या । एकः । द्वौ । बहवः । इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनम् ।[3]

इति ।

अस्याः व्याख्यायाः अभिप्रायस्तु एवं वर्तते –

प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च प्रातिपदिनार्थलिङ्गपरिमाणवचनानीति द्वन्द्वसमासः । प्रातिपदिकार्थलिङ्गपरिमाणवचनान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रमिति अस्वपदविग्रहः । मात्रशब्दोऽवधारणे । 'मात्रं कार्त्स्न्येऽवधारणे'[4] इत्यमरः । 'मयूरव्यंसकादयश्च'[5] इति सूत्रेण अत्र नित्यसमासः भवति । अत्र मात्रशब्दस्य द्वन्द्वान्ते श्रूयमाणत्वात् प्रातिपदिकार्थे, लिङ्गे, परिमाणे, वचने च प्रत्येकमपि मात्रशब्देन साकमन्वयः भवतीत्यर्थः । वचनशब्दस्य सङ्ख्या इत्यर्थः । अतः "प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे (सङ्ख्यामात्रे) च प्रथमा स्यादिति सूत्रस्यास्यार्थो सिद्ध्यति । परन्तु प्रातिपदिकार्थं विना केवलं लिङ्गस्य, केवलं परिमाणस्य च उपस्थितिः क्वापि = कुत्रापि नास्ति । उदाहरणार्थं, महान् इति शब्दे प्रातिपदिकार्थोऽपि भवति, तेन साकं पुंलिङ्गरूपः अर्थः अपि भवति । अतः वृत्तौ भट्टोजिदीक्षितेन सूत्रस्यार्थः एवं लिखितः – "प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये सङ्ख्यामात्रे च प्रथमा स्यात्" इति । प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये सङ्ख्यामात्रे च प्रथमा स्यादित्यभिप्रायः । अतः प्रातिपदिकार्थमात्रे (केवले प्रातिपदिकार्थे) द्योत्यमाने सति प्रथमा विभक्तिः भवतिः प्रातिपदिकार्थेन सह लिङ्गमात्रम् आधिक्येन भवति चेत् तदापि प्रथमा विभक्तिर्भवतिः प्रातिपदिकार्थेन सह परिमाणमात्रम् आधिक्येन भवति चेत् तदापि प्रथमा विभक्तिर्भवति । प्रातिपदिकार्थेन सह सङ्ख्यामात्रं भवति चेत् तदापि प्रथमा विभक्तिर्भवति ।

तर्हि प्रातिपदिकार्थो नाम कः ? इति प्रश्नः समुदेति । अस्य प्रश्नस्य समाधानरूपेण वृत्तिकारः भट्टोजिदीक्षितः लिखति – "नियतोपस्थितिकः प्रातिपदिकार्थः" इति । नियता उपस्थितिः यस्य सः नियतोपस्थितिः इति विग्रहवाक्यम् । स्वार्थे कप् प्रत्ययः भवति । अतः नियतोपस्थितिकः इति रूपमपि साधु एव । अत्र बहुर्व्रीहिसमासः । यस्मिन् प्रातिपदिके उच्चारिते सति यस्य अर्थस्य नियतेन उपस्थितिः भवति सः प्रातिपदिकार्थः इत्यभिप्रायः । प्रातिपदिकं नाम नामपदस्य मूलरूपम् । उदाहरणार्थम् – 'रामः' इति नामपदस्य प्रातिपदिकं 'राम' इति । 'राम' इति प्रातिपदिके 'सु' इति सुप् प्रत्ययस्य योगः भवति चेत् 'रामः' इति रूपं सिद्ध्यति (राम+सु) । तथैव राम इति प्रातिपदिकेन साकम् औ इति सुप् प्रत्ययः युज्यते चेत् 'रामौ' इति रूपं सिद्ध्यति । प्रातिपदिकस्य अर्थः प्रातिपदिकार्थः । नियतस्य वस्तुनः उपस्थितिः प्रातिपदिकार्थः भवति । नाम 'पुस्तक' इति प्रातिपदिकस्य उच्चारणेन पुस्तकमिति वस्तुनः आकृतेः ज्ञानं भवति । प्रातिपदिकार्थः नाम प्रातिपदिकस्य विशुद्धः अर्थः । अर्थात् लिङ्गवचनपरिमाणाद्यन्यान् अर्थान् विहाय केवलं प्रातिपदिकस्य यः अर्थः भवति सः प्रातिपदिकस्य विशुद्धः अर्थः । प्रातिपदिकस्य विशुद्धः अर्थः यत्र द्योत्यते तत्र प्रथमा विभक्तिः प्रयोक्तव्या । प्रातिपदिकार्थाः के भवन्ति ? इत्यस्मिन् विषये वैयाकरणानां मतभेदाः सन्ति । बालमनोरमाकारः प्रातिपदिकार्थाः के ? इत्यस्मिन् विषये मतचतुष्टयं प्रदर्शयति – केचन प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्विकं प्रातिपदिकार्थः इति कथयन्ति । अन्ये प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं चेति त्रिकं प्रातिपदिकार्थः इति कथयन्ति । अपरे, प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं सङ्ख्या चेति चतुष्कं प्रातिपदिकार्थः इति कथयन्ति । अन्ये वैयाकरणाः प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं सङ्ख्या कारकं चेति पञ्चकं प्रातिपदिकार्थः इति कथयन्ति ।

प्रवृत्तिनिमित्तं नाम किम् ? इति प्रश्नस्य समाधानमित्थं भवति – "यस्य कस्यापि शब्दस्य शब्दस्य प्रवृत्तौ यन्निमित्तं भवति तदेव तस्य शब्दस्य प्रवृत्तिनिमित्तं भवति । यथा – पुस्तकं दृष्ट्वा जनाः तत् पुस्तकमिति किमर्थं वदन्ति ? इति चेत् – "पुस्तके पुस्तकत्वमस्ति । अतः जनाः तं पुस्तकं कथयन्ति" इति समाधानम् । एवं पुस्तकस्य प्रवृत्तिनिमित्तं भवति पुस्तकत्वम् । तथा घटस्य प्रवृत्तिनिमित्तं घटत्वं भवति । पटस्य प्रवृत्तिनिमित्तं पटत्वं भवति । एवं प्रवृत्तिनिमित्तं प्रातिपदिकस्य एकः अर्थः भवति । न केवलं प्रवृत्तिनिमित्तम् एकमेव प्रातिपदिकस्य अर्थः भवतिः अपि च व्यक्तिरपि प्रवृत्तिनिमित्तेन सह प्रातिपदिकस्यार्थः भवति । अर्थात् एकस्य प्रातिपदिकस्य उच्चारणेन तस्य प्रातिपदिकस्य प्रवृत्तिनिमित्तमपि ज्ञायते, तथा

---

[3] वैयाकरणसिद्धान्तकौमुद्यां ५३२ तमस्य सूत्रस्य भट्टोजिदीक्षितकृता व्याख्या ।

[4] अमरकोषः ३.३.१७८.२

[5] अष्टाध्यायी २.१.७२

तत्प्रातिपदिकबोधकव्यक्तेः ज्ञानमपि भवति । उदाहरणार्थं 'घट' इति प्रातिपदिकस्योच्चारणेन घटत्वमिति प्रवृत्तिनिमित्तस्यापि बोधो भवतिः घटः इति कश्चन पदार्थः भवतीति व्यक्तेः ज्ञानमपि भवति । तथा 'राम' इति प्रातिपदिकस्योच्चारणेन रामत्वमिति प्रवृत्तिनिमित्तं तथा राम इति कश्चन व्यक्तिः चेति अर्थद्वय बुध्यते । एवं प्रातिपदिकार्थः प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्विप्रकारको भवतीति बोध्यम् । केचन महाशयाः त्रीन्, चतुरः, पञ्च च प्रातिपदिकार्थान् कथयन्ति । परन्तु तेषां मतं न समीचीनम् । किमर्थमिति विचारयामः । ये त्रयः प्रातिपदिकार्थाः इति कथयन्ति तेषां मतानुसारेण 'राम' इति प्रातिपदिकस्योच्चारणेन रामत्वमिति प्रवृत्तिनिमित्तं, राम इति व्यक्तिः च बोध्येतेः ताभ्यां साकं तथा पुंलिङ्गमिति लिङ्गमपि बोध्यते । रामशब्दे एतदन्वेति, सत्यम् । राम इति प्रातिपदिकस्थाने अत्र दोषो न भवति । यतो हि रामशब्दः केवलं पुंसि वर्तते । परन्तु संस्कृते सर्वे शब्दाः एकलिङ्गवाच्याः न भवन्ति । केचन द्विलिङ्गवाच्यशब्दाः सन्ति, अन्ये केचन त्रिलिङ्गवाच्यशब्दाः अपि सन्ति । तादृशशब्दानां प्रातिपदिकस्योच्चारणे कृते सति त्रयः प्रातिपदिकार्थाः बोध्यन्ते इत्युक्ते दोषो भवति । उदाहरणार्थम् – आकाशशब्दः पुंसि नपुंसके च भवति । आकाश इति प्रातिपदिकस्योच्चारणेन आकाशत्वमिति प्रवृत्तिनिमित्तम्, आकाश इति व्यक्तिश्च बोध्येते । परन्तु यद्यपि पुंलिङ्गवाचि-आकाशशब्दः, नपुंसकलिङ्गवाचि-आकाशशब्दः एतद्द्वयमपि समानमेव अर्थं बोधयति तथापि वक्तुः विवक्षा पुंलिङ्गवाच्य-आकाशशब्दस्य उत नपुंसकलिङ्गवाच्य-आकाशशब्दस्य वेति केवलम् आकाश इति प्रातिपदिकस्योच्चारणेनावगन्तुं न शक्नुमः । अतः लिङ्गं प्रातिपदिकार्थः न भवतीति सिद्धम् । सङ्ख्या अपि प्रातिपदिकार्थः न भवति । यतो हि प्रातिपदिकस्य केवलस्य उच्चारणेन वक्त्रा उच्चार्यमाणं वस्तु कां सङ्ख्यां बोधयतीति अवगन्तुं न शक्नुमः । एवमेव कारकमपि प्रातिपदिकार्थः न भवति । यतो हि केवलं प्रातिपदिकम् उच्चारितं चेत् वक्त्रा कर्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरणेषु किं कारकमभिप्रेतम् ? कारकमभिप्रेतं वा सम्बन्धार्थो अभिप्रेतो वा ? इति न ज्ञायते । अतः केवलं प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्वावेव प्रातिपदिकार्थौ । ये वैयाकरणाः प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्वावेव प्रातिपदिकार्थौ इति कथयन्ति तेषामेव मतं समीचीनमिति ज्ञेयम् ।

अत्र कौमुदीकारेण भट्टोजिदीक्षितेन 'प्रातिपदिकार्थमात्रे' इत्यस्य इमानि उदाहरणानि दर्शितानि – उच्चैः, नीचैः, कृष्णः, श्री, ज्ञानं चेति । ननु अव्ययेषु 'सामान्ये नपुंसकम्' इति न्यायात् नपुंसकत्वस्य च कृष्णशब्दे पुंस्त्वस्य च श्रीशब्दे स्त्रीत्वस्य च ज्ञानशब्दे नपुंसकत्वस्य च भानात् कथम् एतानि प्रातिपदिकार्थमात्रस्योदाहरणानि भवन्तीति आक्षेपं परिहरन् भट्टोजिदीक्षितः कथयति – "अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम्"[6] इति ।

"अव्ययादाप्सुपः"[7] इति सूत्रे 'अब्ग्रहणं व्यर्थमलिङ्गत्वात्' इति भाष्योक्तरीत्या अव्यये कस्यापि लिङ्गस्यानुपस्थितिरिति प्रातिपदिकार्थमात्रे इत्यस्य अयमुदाहरणं भवति । [अत्र उच्चैः, नीचैः – एतद्द्वयम् अव्ययं भवति ।] परन्तु कृष्णशब्दे पुंस्त्वस्य, श्रीशब्दे स्त्रीत्वस्य, ज्ञानशब्दे नपुंसकत्वस्य च नियमेन भानमस्ति तेषां नियतलिङ्गत्वात् । अतस्तेषु लिङ्गानामपि प्रातिपदिकार्थान्तर्भावात् तेषामपि प्रातिपदिकार्थमात्रे इत्युदाहरणत्वं निर्बाधमिति भावः । यद्यपि कृष्णः पटः, कृष्णा पटी, कृष्णं वस्त्रम् इत्यादौ कृष्णशब्दः त्रिलिङ्गवाच्यः[8] भवति तथापि अत्र एते कृष्णशब्दाः न विवक्षिताः, अत्र भगवत्परः कृष्णशब्दः एव विवक्षितः इति भावः । न च प्रातिपदिकोक्तार्थे किं प्रथमेति वाच्यम्, एकत्वादिसङ्ख्याबोधार्थत्वात् । न चाव्ययात् प्रथमोत्पत्तेः फलाभावः 'अव्ययादाप्सुपः'[9] इति लुकोऽवश्यं प्रवृत्तेरिति वाच्यम् । पदत्वार्थं सुबुत्पत्तेरावश्यकत्वात् । तेन उच्चैरित्यादौ रुत्वविसर्गौ 'उच्चैस्ते सम्यगुच्चारणम्'[10] इत्यादौ तेमयादिसिद्धिश्च भवति ।

एवं प्रातिपदिकार्थमात्रे द्योत्यमाने सति प्रथमा विभक्तिः प्रयोक्तव्या इति सिद्धम् । प्रातिपदिकार्थेन सह लिङ्गमात्रमाधिक्येन द्योत्यमाने सति कथं प्रथमा स्यादिति विचारयामः –

---

[6] अलिङ्गाः नाम अव्ययानि ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥

इति लक्षणे प्रतिपादितानि पदानि अव्ययानि भवन्ति । नियतलिङ्गाः नाम एकलिङ्गशब्दाः । केवलं पुंलिङ्गशब्दाः, केवलं स्त्रीलिङ्गशब्दाः, केवलं नपुंसकलिङ्गशब्दाश्च नियतलिङ्गशब्दाः । उदाहरणार्थं रामः, सीता, वनम् इत्यादयः शब्दाः । रामशब्दः केवलं पुंसि एव भवति, स्त्रीनपुंसकयोः नास्ति । सीताशब्दः केवलं स्त्रीलिङ्गे एव अस्ति; पुंनपुंसकयोः नास्ति । वनशब्दः केवलं नपुंसके एव भवति । पुंस्त्रीलिङ्गयोः नास्ति । एते सर्वेऽपि प्रातिपदिकार्थमात्र इत्यस्योदाहरणानि । अर्थात् अलिङ्गशब्दाः (अव्ययशब्दाः) तथा नियतलिङ्गशब्दाः च प्रातिपदिकार्थमात्र इत्यस्योदाहरणानि । अलिङ्गशब्देषु (अव्ययेषु), नियतलिङ्गशब्देषु च केवलं प्रातिपदिकार्थमात्रे द्योत्यमाने सति प्रथमा विभक्तिः प्रयोक्तव्या इत्यभिप्रायः ।

[7] अष्टाध्यायी ८.४.८२

[8] यः शब्दः पुंलिङ्गवाच्यः अपि भवति स्त्रीलिङ्गवाच्यः अपि भवति नपुंसकलिङ्गवाच्यः अपि भवति सः त्रिलिङ्गवाच्यः शब्दः ।

[9] अष्टाध्यायी ८.४.८२

[10] वैयाकरणसिद्धान्तकौमुदी – सूत्रम् ५३२ – बालमनोरमाटीका

प्रातिपदिकार्थेन सह लिङ्गमात्राधिक्ये द्योत्यमाने सति प्रथमा कथं स्यादित्यस्य अनियतलिङ्गशब्दाः उदाहरणानि । यथोक्तं भट्टोजिदीक्षितेन, "अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य" इति । यतो हि नियतलिङ्गशब्देषु प्रवृत्तिनिमित्तेन व्यक्तिना च साकं लिङ्गमपि प्रातिपदिकार्थे अन्तर्भवति । अतः नियतलिङ्गशब्दाः प्रातिपदिकार्थमात्रस्योदाहरणानि भवन्ति । अनियतलिङ्गशब्दाः (द्विलिङ्गाः त्रिलिङ्गाश्च शब्दाः) प्रातिपदिकार्थेन सह लिङ्गमात्राधिक्ये द्योत्यमाने सति कथं प्रथमा स्यादित्यस्योदाहरणानि भवन्ति । यतो हि अनियतलिङ्गशब्दानां प्रातिपदिकमात्रस्योच्चारणेन केवलं प्रवृत्तिनिमित्तं व्यक्तिश्च ज्ञायेते: वक्ता किं लिङ्गं विवक्ष्य वदतीति न ज्ञायते । अतः अनियतलिङ्गशब्देषु लिङ्गं प्रातिपदिकार्थे नान्तर्भवति । अतः अनियतलिङ्गशब्दाः प्रातिपदिकार्थमात्रस्योदाहरणानि नैव भवन्ति । किञ्च प्रातिपदिकार्थेन सह लिङ्गमात्राधिक्यस्योदाहरणानि भवन्ति । अत्र भट्टोजिदीक्षितः प्रातिपदिकार्थेन सह लिङ्गमात्राधिक्यस्योदाहरणं दर्शयति – "तटः, तटी, तटम्" इति । 'तटं त्रिषु'[11] इति अमरकोशोक्तरीत्या तटशब्दः त्रिषु लिङ्गेष्वपि भवति । पुंलिङ्गे तटः इति, स्त्रीलिङ्गे तटी इति, नपुंसकलिङ्गे तटम् इति । एवं तटशब्दः अनियतलिङ्गशब्दः इति हेतोः केवलं तट इति प्रातिपदिकार्थमात्रस्योच्चारणेन अत्र वक्त्रा पुंलिङ्गवाचितटशब्दो विवक्षितो वा ? स्त्रीलिङ्गवाचितटशब्दो विवक्षितो वा ? नपुंसकलिङ्गवाचितटशब्दो विवक्षितो वा ?" इति न ज्ञायते । अतः लिङ्गस्य स्पष्टीकरणार्थम् अत्र प्रातिपदिकार्थमात्रं नालम् । प्रातिपदिकार्थेन सह लिङ्गमात्राधिक्यस्यापि ग्रहणं कर्तव्यम् । अर्थात् पुंलिङ्गः विवक्षितश्चेत् तटः इति स्पष्टतया वक्तव्यम् । स्त्रीलिङ्गः विवक्षितः चेत् तटी इति, नपुंसकलिङ्गः अपेक्षितः चेत् तटम् इति च स्पष्टतया वक्तव्यं भवति । एवं प्रातिपदिकार्थेन सह लिङ्गमात्राधिक्ये द्योत्यमाने अपि प्रथमैव विभक्तिर्भवति ।

प्रातिपदिकार्थेन सह परिमाणमात्राधिक्ये द्योत्यमाने सति कथं प्रथमा भवतीत्यस्योदाहरणं भट्टोजिदीक्षितः प्रदर्शयति - "द्रोणो व्रीहिः" इति । द्रोणः नाम परिमाणविशेषः ।

जालसूर्यमरीचिस्थं त्रसरेणुरिति स्मृतम् ।
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ॥
गौरस्तु ते त्रयष्षट् ते यवो मध्यस्तु ते त्रयः ।
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश ॥
पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितम् ।
पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम् ॥
चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः ।
आढकस्तैश्चतुर्भिस्तु द्रोण इत्यभिधीयते ॥
आढकस्तैश्चतुर्भिस्तु द्रोण इत्यभिधीयते ।
कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडश ।[12]

इति स्मरणात् ।

एतेषां श्लोकानामयमभिप्रायः एवं वर्तते – जालसूर्यमरीचिस्थं त्रिसरेणुरिति स्मृतम् । अष्टभिः त्रिसरेणुभिः एका लिक्षा भवति । त्रिभिः लिक्षाभिः एकः राजसर्षपः भवति । त्रिभिः राजसर्षपैः एकः गौरः भवति । षड्भिः गौरैः एकः यवः भवति । त्रिभिः यवैः एकः मध्यः भवति । पञ्चभिः मध्यैः एकः कृष्णलः भवति । ते कृष्णलाः एव माषाः भवन्ति । षोडशमाषैः एकः सुवर्णः भवति । चतुर्भिः पञ्चभिर्वा सुवर्णैः एकं पलं भवति । द्वाभ्यां पलाभ्याम् एकं प्रसृतं भवति । द्वाभ्यां प्रसृताभ्याम् एकः कुडवः भवति । चतुर्भिः कुडवैः एकः प्रस्थः भवति । चतुर्भिः प्रस्थैः एकः आढकः भवति । चतुर्भिः आढकैः एकः द्रोणः भवति । द्वाभ्यां द्रोणाभ्याम् एकः कुम्भः भवति । षोडशभिः द्रोणैः एकः शूर्पः खारी भवतीति परिमाणानां परिभाषा वर्तते । अस्यां परिमाणपरिभाषायां द्रोणस्यान्तर्भावात् द्रोणः अपि एकः परिमाणविशेषः इति सिद्धम् ।

"द्रोणो व्रीहिः" इत्यत्र व्रीहिशब्दः एकवचनान्तः भवति । परन्तु अत्र जात्यैकवचनं (जात्या एकवचनं) भवति । "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"[13] इत्युक्तरीत्या अत्र व्रीहिशब्दस्य व्रीहिराशिरित्यर्थः । एकवचनान्तेन दत्तः इति हेतोः एकः व्रीहिरिति अर्थः न भवति । एवं "द्रोणो व्रीहिः" इत्यत्र व्रीहिशब्दः व्रीहेः जातिं सूचयति । न तु एकं व्रीहिं सूचयति । अतः "द्रोणो व्रीहिः" इत्यस्य एकस्मिन् द्रोणे सम्पूर्णं व्रीहयः सन्तीति अभिप्रायः भवति । न तु द्रोणे एकः व्रीहिः भवतीत्यभिप्रायः । परिमाणग्रहणं किमर्थं कृतमित्याक्षेपं परिहरति भट्टोजिदीक्षितः – "प्रत्ययार्थे परिमाणे प्रकृत्यर्थः अभेदेन संसर्गेण विशेषणम् । प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः" इति । न हि द्रोणत्वेन रूपेण परिमाणविशेषवाचिद्रोणशब्दात् स्वार्थे प्रथमाविभक्तिरिष्यते, येन प्रातिपदिकार्थमात्र इत्यनेन गतार्थता स्यात् । किन्तु द्रोणत्वेन परिमाणवाचनो द्रोणशब्दात् परिमाणत्वसामान्यरूपेण द्रोणपरिमाणे विवक्षिते प्रथमा विभक्तिर्विधीयते । ततश्च प्रत्ययार्थे परिमाणसामान्ये द्रोणशब्दार्थात्मकप्रकृत्यर्थः परिमाणविशेषः सामान्यविशेषात्मकेनाभेदसंसर्गेणान्वेति ।

---

[11] अमरकोषः १.१०.७.२.५

[12] वैयाकरणसिद्धान्तकौमुदी – सूत्रम् ५३२ – बालमनोरमाटीका

[13] अष्टाध्यायी १.२.५८

परिमाणसामान्यात्मकप्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ अन्वेति । तथा च द्रोणाख्यपरिमाणविशेषात्मकं यत् सामान्यपरिमाणं तत्परिच्छिन्नो व्रीहिः इति बोधः फलति । अन्यथा द्रोणाख्यपरिमाणविशेषावच्छिन्नो व्रीहिः इति बोधः स्यात् । परिमाणसामान्यं न प्रतीयेत । तदर्थमिह परिमाणग्रहणमित्यर्थः । आर्थात् "द्रोणरूपं यत्परिमाणं तदवच्छिन्नो व्रीहिः" इत्यत्र परिच्छेदकपरिच्छिन्नसम्बन्धः अस्ति । द्रोणो व्रीहिः इत्यत्र परिच्छिन्नः व्रीहिः, परिच्छेदकः द्रोणः । अत्र द्रोणशब्दस्य द्रोणरूपपरिमाणमित्यर्थः । एवं द्रोणशब्देन द्रोणत्वमिति प्रवृत्तिनिमित्तमपि भवति । द्रोण इति किमपि परिमाणं भवतीत्यपि बोध्यते । एवमत्र द्रोणशब्दे प्रातिपदिकार्थेन सह परिमाणमात्रम् आधिक्येन भवति । अतः द्रोणशब्दस्य प्रथमाविभक्तिः भवति । "नीलो घटः" इत्यत्र "नीलाभिन्नः घटः" इति शाब्दबोधः भवति । अत्र अभेदसम्बन्धेन अन्वयः । कुतः इति चेदत्र नील-घटयोर्मध्ये सामानाधिकरण्यं वर्तते । वैयाकरणानां मते सामानाधिकरण्यं नाम समानविभक्तिकत्वमित्यर्थः । यत्र सामानाधिकरण्यं वर्तते तत्र अभेदसम्बन्धः भवति । परन्तु तार्किकाणां मते सामान्याधिकरणम् इत्यस्य "समानमधिकरणं येषां सः" इति निष्पत्तिः । येषां पदार्थानामधिकरणं समानं भवति तत् सामानाधिकरण्यमित्यर्थः । उदाहरणार्थं कटे पुस्तक-लेखन-सुधाखण्डानि भवन्तीत्यत्र पुस्तक-लेखनी-सुधाखण्डानां त्रयाणामपि सामानाधिकरण्यं भवति कटः । एवं "द्रोणो व्रीहिः" इत्यत्र द्रोणभिन्नं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरिति परिच्छेद्यपरिच्छेदकभावः अस्ति । अत्र परिच्छेद्यं भवति द्रोणः । परिच्छेदको व्रीहिः । तथा च "नीलो घटः" इत्यत्र नीलः विशेषणम् । घटश्च विशेष्यम् । विशेषणाभिन्नो विशेष्यः इति शाब्दबोधः ।

प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये द्योत्यमाने सति कथं प्रथमा स्यादिति दृष्टम् । प्रातिपदिकार्थमात्रे परिमाणमात्रे द्योत्यमाने कथं प्रथमा स्यादित्यपि दृष्टम् । इदानीं प्रातिपदिकार्थमात्रे वचनमात्राधिक्ये द्योत्यमाने कथं प्रथमा स्यादिति पश्यामः । ननु वृत्तौ भट्टोदीक्षितेन वृत्तौ सूत्रस्य अर्थः एवं लिखितः – "प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये सङ्ख्यामात्रे च प्रथमा स्यात्" इति । अर्थात् वचनशब्दस्य स्थाने भट्टोजिदीक्षितेन सङ्ख्याशब्दः लिखितः । परन्तु सूत्रे सङ्ख्याशब्दः नास्ति । वचनशब्दः अस्ति । किमर्थं तथा लिखितमिति भट्टोजिदीक्षितः तत्रैव किञ्चिदग्रे स्पष्टयति – "वचनं सङ्ख्या । एकः । द्वौ । बहवः" इति । वचनशब्दस्य सङ्ख्या इत्यर्थः । अतः वचनशब्देन अत्र सङ्ख्या एव ग्राह्या । एकः, द्वौ, बहवः इत्यादयः सङ्ख्यावाचकशब्दाः । अत्र एकः इति सङ्ख्या एकवचनं बोधयति । द्वौ इति सङ्ख्या द्विवचनं बोधयति । बहवः इति शब्दः बहुवचनं (त्रि-चतुरादिकं) बोधयति । एवम् एतादृशाः सङ्ख्यावाचकशब्दाः प्रातिपदिकार्थेन सह आधिक्येन दृश्यन्ते चेत् प्रथमाविभक्तिः प्रयोक्तव्या । उदाहरणार्थम् – "एक" इत्यत्र एकत्वमिति प्रवृत्तिनिमित्तं, एकमिति सङ्ख्या च द्योत्येते । अतः अत्र प्रथमाविभक्तिः प्रयोक्तव्या ।

अत्र भट्टोजिदीक्षितः कञ्चन विशेषांशं प्रतिपादयति – "इह उक्तार्थत्वात् विभक्तेरप्राप्तौ वचनम्" इति । प्रकृतिभिरेव एकत्वादीनामुक्तत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन प्रथमाविभक्तेरप्राप्तौ तदर्थं वचनग्रहणं कृतमित्यर्थः । तथा च विभक्तिरिहानुवादिका शब्दसाधुत्वार्थं प्रयोज्या, 'न केवला प्रकृतिः प्रयोक्तव्या, नापि प्रत्ययः' इति अनभिहितसूत्रभाष्यसिद्धान्तन्यायादिति भावः । इदमेव अभिप्रेत्योक्तं भाष्ये – 'उक्तार्थेष्वप्येकत्वादिषु प्रथमा' इति । मात्रग्रहणात् कारकाद्याधिक्ये प्रथमा न भवति । अत्र 'अर्थे प्रथमा' इत्येव सूत्रयितुम् उचितमिति प्रौढमनोरमादौ प्रपञ्चितम् । अस्य एवमभिप्रायः – उक्तार्थानामप्रयोगः इति न्यायात् एकस्मिन् वाक्ये एकत्र प्रयुक्तस्य पदस्य अर्थयुक्तं पदं पुनरपि न प्रयोक्तव्यम् । यथा – "गणपतिः पूज्यः" इति वाक्यं साधु । परन्तु "गणपतिः हेरम्बः लम्बोदरः गजाननः पूज्यः" इति वाक्यं व्याकरणदृष्ट्या असाधु । यतो हि गणपतिः, हेरम्बः, लम्बोदरः, गजाननः एते सर्वेऽपि समानार्थकशब्दाः । वाक्ये तेषु पदेषु एकस्य ग्रहणम् अलम् । सर्वेषामपि समानार्थकपदानां ग्रहणं न उचितम् एकस्मिन् वाक्ये । एवं "वचनं सङ्ख्या" इत्यत्रापि "उक्तार्थानामप्रयोगः" इति न्यायात् एकार्थयुक्तस्य पदस्य द्विग्रहणदोषः अत्र अस्तीति आक्षेपस्य परिहारः एवमस्ति – "तथा नास्ति । अत्र सङ्ख्यावाचकपदानां कृते प्रथमा विभक्तिः भवतीति कथयितुं वचनग्रहणं कृतम् । वचनं सङ्ख्येति प्रयुक्तम् । अतः अत्र न दोषः" इति । एवं "न केवलं प्रकृतिः प्रयोक्तव्या, नापि प्रत्ययः" इति न्यायात् संस्कृतभाषायां केवलं प्रकृतिरपि न प्रयोक्तव्या । केवलं प्रत्ययोऽपि न प्रयोक्तव्यः ।

"अत्र घटः वर्तते" – अस्मात् वाक्यादेव अत्र एक एव घटः वर्तते इति अवगम्यते । पृथगेव, "अत्र एक एव घटः वर्तते" इति कथनस्यावश्यकता नास्ति । कुतः इति चेत् वाक्येऽस्मिन् "घटः" इत्यत्र 'सु' इति यः सुप् प्रत्ययः वर्तते सः एकत्वं (एकवचनं) बोधयति । एवं प्रत्ययवशादपि वचनं ज्ञायते । एवमेव 'एक' इति प्रकृत्या एव एकवचनमिति ज्ञायते । एवं केवलं प्रकृत्या एव वचने ज्ञायमाने सति अत्र "एकः+सु=एकः" इति सुप् प्रत्ययस्य स्थापनं किमर्थम् ? इति आक्षेपस्य एवं समाधानम् – वाक्ये प्रयोगसाधुत्वार्थं तथा कृतम् । संस्कृतभाषायां केवला प्रकृतिः न

प्रयोक्तव्या । केवलं प्रत्ययोऽपि न प्रयोक्तव्यः । प्रत्ययसहितः प्रकृतिः एव प्रयोक्तव्या । (अर्थात् प्रकृतिप्रत्यययोः मेलनं कृत्वा एव पदप्रयोगः कार्यः संस्कृतभाषायां, "न केवला प्रकृतिः प्रयोक्तव्या, नापि प्रत्ययः" इति नियमात् । एवं, "रामः वनं गतवान्" इति प्रयोगः साधुः । परन्तु "राम वनं गतवान् इति प्रयोगः असाधुः । अत्र निर्विभक्तिपदप्रयोगः कृतः इति हेतोः । तथैव "रामः" इति लेखनस्थाने राम्सु इति प्रकृतिप्रत्ययौ विभज्य लिख्यते चेत् असाधुः । रामः इति प्रकृतिप्रत्ययौ संयोज्य एव (विभक्तिप्रत्ययं संयोज्यैव) लेखनीयम् ।

**प्रथमाविभक्तिविधायकं द्वितीयं सूत्रम् – सम्बोधने च –**

प्रथमाविभक्तिविधायकं गौणं सूत्रमिदम् । अस्य सूत्रस्य व्याख्या भट्टोजीक्षितेन अधोनिर्दिष्टरीत्या कृता –

इह प्रथमा स्यात् । हे राम ॥[14]

इति ।

सम्बोधनेऽपि प्रथमा विभक्तिः प्रयोक्तव्या । यथा – हे राम, हे रामौ, हे रामाः । हे सीता, हे सीते, हे सीताः । हे वनम्, हे वने, हे वनानि इत्यादिरूपेण । एवं सम्बोधने या प्रथमा विभक्तिः प्रयुज्यते सा सम्बोधनप्रथमाविभक्तिः इत्युच्यते । शब्दरूपाणां लेखनावसरे सम्बोधनप्रथमाविभक्तिरूपाणि सप्तमीविभक्तेरनन्तरमपि लेखितुं शक्यन्ते । उत प्रथमाविभक्तेरनन्तरमपि लेखितुं शक्यन्ते ।

"हे राम ! मां पाहि" इत्यत्र रामं प्रति रक्षणार्थं सम्बोधनं भवति । इह रामं प्रति मद्रक्षणं ज्ञाप्यम् । न च "हे राजन्, सार्वभौमो भव" इत्यत्र सार्वभौमशब्दादपि प्रथमा स्यादिति वाच्यम् । सम्यग् बोधनमेव हि सम्बोधनम् । समित्युपसर्गबलात् । श्रोतरि विशिष्य राजत्वादिना ज्ञाते सत्येव तं प्रति कश्चिदर्थो ज्ञापयितुं शक्यः, नान्यथा । ततश्च सम्बोधनविभक्तिरियमनुवाद्यविषयैवेति लभ्यते, न तु विधेयविषया । तथा च सार्वभौमत्वविधेयस्य इदानीमसिद्धत्वेन अनुवाद्याभावात् न सार्वभौमशब्दात् सम्बोधनविभक्तिरिति मञ्जूषायां विस्तरः ।

स्वस्मिन् विषये ध्यानस्य आकर्षणं सम्बोधनम् (सम्बुद्धिः) । सम्बोधनं नाम अभिमुखीभावः । कश्चन तस्य कार्ये व्यस्तः भवति, तस्य आह्वानेन अस्माकं विषये तस्य आकर्षणं सम्बोधनमित्युच्यते । उदाहरणार्थम् – देवदत्तः पुस्तकं पठन्नस्ति । तस्य समीपे यज्ञदत्तः आगत्य देवदत्तं सम्बोधयति, "हे देवदत्त, अत्र पश्य" इति । तावत्पर्यन्तं देवदत्तस्य ध्यानं यज्ञदत्तविषये नासीत् । पुस्तकपठने एव देवदत्तस्य ध्यानम् आसीत् । तदानीं स्वविषये तस्य आकर्षणार्थं यज्ञदत्तः देवदत्तस्य सम्बोधनं कृतवान् । यज्ञदत्तः यदा देवदत्तस्य सम्बोधनं कृतवान् तदा देवदत्तः पुस्तकपठनात् स्वलक्ष्यं यज्ञदत्तविषये केन्द्रीकरोति । अर्थात् क्षणकालं पुस्तकपठनाद्विरम्य यज्ञदत्तं पश्यति । एवं स्वं प्रति अन्यस्य आकर्षणार्थम् अस्माभिः तेषाम् आह्वानं यत् क्रियते तदेव सम्बोधनमित्युच्यते । सम्बोधने प्रथमा विभक्तिः प्रयोक्तव्या । 'हे देवदत्त !' इत्यत्रापि प्रातिपदिकार्थः अस्त्येव । यतो हि "हे देवदत्त" इति उच्चाहणेन देवदत्तत्वमिति प्रवृत्तिनिमित्तं तथा देवदत्तः इति व्यक्तिः एतत् अर्थद्वयं बुध्यते । अतः अत्र प्रातिपदिकार्थस्य द्योत्यमानत्वात् प्रथमा विभक्तिः अस्त्येव । किन्तु अत्र प्रातिपदिकार्थेन सह सम्बोधनमपि भवति । एवं प्रातिपदिकार्थेन सह सम्बोधने द्योत्यमाने अपि प्रथमा विभक्तिः प्रयोक्तव्या इति सूचयितुं "सम्बोधने च" इति सूत्रं कृतं पाणिनिना । "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इत्यनेन सूत्रेण केवलं प्रातिपदिकार्थं भवति चेत्, प्रातिपदिकार्थेन सह लिङ्गमात्रमाधिक्येन भवति चेत्, प्रातिपदिकार्थेन सह परिमाणमात्रमाधिक्येन भवति चेत्, प्रातिपदिकार्थेन सह सङ्ख्यामात्रमाधिक्येन भवति चेत् प्रथमा विभक्तिः प्रयोक्तव्या इति उक्तम् । किन्तु प्रातिपदिकार्थेन सह सम्बोधने आधिक्येन द्योत्यमाने सत्यपि प्रथमा विभक्तिः प्रयोक्तव्या इति तस्मिन् सूत्रे नोक्तम् । परन्तु प्रातिपदिकार्थेन सह सम्बोधने आधिक्येन द्योत्यमाने अपि प्रथमाविभक्तिप्रयोगः संस्कृतभाषायां वर्तते । अतः तज्ज्ञापयितुं पाणिनिना, "सम्बोधने च" इति सूत्रं पृथक् निर्दिष्टमित्यवगन्तव्यम् ।

एवं "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" तथा "सम्बोधने च" – आभ्यां सूत्राभ्यां सु, औ, जस् एतेषां त्रयाणां सुप् प्रत्ययानां विधानं कृतं वर्तते । यतो हि संस्कृतभाषायाम् एकवचनं, द्विवचनं, बहुवचनं चेति वचनत्रयं भवति । सप्तसु अपि विभक्तिषु एते त्रयः विभक्तयः भवन्ति । [सम्बोधनविभक्तिः प्रथमाविभक्तेरेव रूपम् । अतः प्रथमा विभक्तावेव सम्बोधनविभक्तिरपि अन्तर्भवति । एवं सम्बोधनविभक्तावपि वचनत्रयं भवत्येव ।] एवं सप्तसु विभक्तिषु प्रत्येकमपि वचनत्रयं भवति । एवं ७ ३=२१ विभक्तिप्रत्ययाः भवन्ति येषां सुप् प्रत्ययाः इति नाम । इत्थं विभक्तयः भवन्ति सप्तः विभक्तिविधायकप्रत्ययाः भवन्ति एकविंशतिः । प्रत्येकं विभक्तौ वचनत्रयं भवतीति हेतोः । एते एकविंशतिः सुप् प्रत्ययाः पाणिनिना अष्टाध्याय्याम् अनेन सूत्रेण सङ्गृहीताः – "सौजसमौट्छष्टाभ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्-भ्यस्-

[14] वैयाकरणसिद्धान्तकौमुद्यां ५३३ तमस्य सूत्रस्य भट्टोजिदीक्षितकृता व्याख्या ।

ङसोसाम्-ङ्योस्-सुप्"[15] इति । एवं प्रथमाविभक्तौ सु, औ, जस् इत्येतत् प्रत्ययत्रयं भवति । सु इति प्रत्ययः प्रथमा विभक्तौ एकवचनं बोधयति । औ इति प्रात्ययः प्रथमाविभक्तावेव द्विवचनं बोधयति । जस् इति प्रत्ययः प्रथमा विभक्तावेव बहुवचनं बोधयति । एवं प्रातिपदिकार्थे द्योत्यमाने, प्रातिपदिकार्थेन सह लिङ्गमात्राधिक्ये द्योत्यमाने, प्रातिपदिकार्थेन सह परिमाणमात्राधिक्ये द्योत्यमाने, प्रातिपदिकेन सह सङ्ख्यामात्रे द्योत्यमाने, प्रातिपदिकार्थेन सह सम्बोधने द्योत्यमाने च सति सु, औ, जस् एते त्रयः प्रत्ययाः प्रयोक्तव्याः इत्यभिप्रायः । अर्थात् प्रातिपदिकार्थादयो एकवचने विवक्षिताश्चेत् सु प्रत्ययः, द्विवचने विवक्षिताश्चेत् औ प्रत्ययः, बहुवचने विवक्षिताः चेत् जस् प्रत्ययः प्रयोक्तव्यः । उदाहरणार्थं राम इति प्रातिपदिकम् एकवचने विवक्षितं चेत् राम+सु = रामः इति, द्विवचने विवक्षितं चेत् राम+औ = रामौ इति, बहुवचने विवक्षितं चेत् राम+जस् = रामाः इति च प्रयोक्तव्यमित्यर्थः ।

**निष्कर्षः**

अस्मिन् शोधपत्रे भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकौमुद्याः आधारेण सामान्यरूपेण प्रथमाविभक्तेः विवेचनं मया कृतम् । एवम् अष्टाध्यायी-सिद्धान्तकौमुदीप्रभृतीनां व्याकरणग्रन्थानाम् आधारेण प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये सङ्ख्यामात्रे सम्बोधने च प्रथमाविभक्तिः प्रयोक्तव्या इति वयं निष्कर्षं दातुं शक्नुमः ।

**सन्दर्भ**


1. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – प्रथमो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु.२०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी
2. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – द्वितीयो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु.२०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी
3. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – तृतीयो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु.२०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी
4. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – चतुर्थो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु.२०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी
5. अष्टाध्यायी, ग्रन्थकर्ता – महर्षिः पाणिनिः, संस्करणम् – सा.यु.२०१३, प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्,, वाराणसी
6. https://sanskritdocuments.org/learning_tools/ashtadhyayi/vyakhya/2/2.3.46.htm


[15] अष्टाध्यायी ४.१.२